# Shri Sita Lakshmi Stotram

# શ્રીસીતાલક્ષ્મીસ્તોત્રમ્

## Document Information


Text title : sItAlakShmI stotra

File name : sItAlakShmIstotram.itx

Category : devii, puShpAshrIvatsan, lakShmI, sItA, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali, 2016

Latest update : December 30, 2020

Send corrections to : Sanskrit@cheerful.com



This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).


Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

March 6, 2022

*sanskritdocuments.org*

# શ્રીસીતાલક્ષ્મીસ્તોત્રમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ ભૂમિપુત્ર્યૈ ચ વિદ્મહે । રામપત્ન્યૈ ચ ધીમહિ ।
તન્નઃ સીતા પ્રચોદયાત્ ॥

સીતા શ્રીરામસજ્જાયા સાનન્દવાક્સ્વરૂપિણી ।
સા સમ્પૂર્ણસુમાઙ્ગલ્યા જ્વલદગ્નિશુચિસ્ફુરા ॥ ૧॥ (૧)

મદમ્બા શ્રીમહાલક્ષ્મીર્મચ્ચિત્તવિલસત્પ્રભા ।
ક્ષમાગુણ્યાતિસાન્ત્વા મા સહજસ્થિતસદ્ગુણા ॥ ૨॥

ક્ષપાનાથપ્રભારૂપા ચન્દ્રાર્કમુખમણ્ડલા ।
સાનસીવિગ્રહાભાસા ચારુસારપ્રભાસિની ॥ ૩॥

પદકોકનદાત્નાભા પદામ્બુજસુલક્ષણા । (૨)
પદપાવિત્ર્યલક્ષણ્યા પદાશ્રિતસુરક્ષણા ॥ ૪॥

કરામ્ભોજાભયાદાત્રી સ્મિતામ્ભોરુહલોચની ।
કરુણામયવીક્ષણ્યા નયનાબ્જવિમોચની ॥ ૫॥

સૌન્દર્યદેવતા સીતા ક્ષ્માપુત્રી જનકાત્મજા ।
શિવચાપલઘૂદ્ધારા કોમલા શક્તિશાલિની ॥ ૬॥

શ્રીરામતન્મયા સીતા રામપત્ની લસચ્છવિઃ ।
કલ્યાણરામસારાધ્યા સીતા ભવ્યસુરૂપિણી ॥ ૭॥

વૈદેહી મૃદુસદ્વાણી ઐહિકાપરપૂરણી ।
રામપ્રેષ્ઠા મહારાજ્ઞી પૂર્ણસદ્ભક્તિકારિણી ॥ ૮॥

રામનામસુધાપાના નામસારપ્રમોદિતા ।

નામસદ્ધ્યાનસઁલ્લીના દહરાકાશદર્શના ॥ ૯॥

શ્રીરામપૂર્ણસચ્ચિત્તા શ્રીરામાનન્યચિન્તના ।
શ્રીરામકીર્તિસમ્મૂલા રામેણ સહ ચારિણી ॥ ૧૦॥

રામાવતારસમ્પૂર્ણા રામાયણસુબીજતા । (૩)
શ્રીરામાભિન્નદિવ્યાભા સાક્ષાત્ બ્રહ્મસ્વરૂપિણી ॥ ૧૧॥

સુસ્વરાજિતમાધુર્યા સઙ્ગીતમૃદુલસ્વરા ।
શ્રીત્યાગબ્રહ્મસઙ્ગીતા ગુરુસ્વામિસુકીર્તિતા ॥ ૧૨॥

ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાસુસંસ્તુતા ।
બાલાલાપસ્તુતિપ્રીતા પુત્રીપુષ્પાબહુપ્રિયા ॥ ૧૩॥

મયેતિ કીર્તિતે માતર્મચ્ચિત્તં પરિપૂરય ।
ચિત્તપ્રસાદનં માતઃ કુરુ મે ભક્તિવર્ધનમ્ ॥ ૧૪॥

મઙ્ગલં રામસત્યૈ ચ સીતાલક્ષ્મ્યૈ સુમઙ્ગલમ્ ।
મઙ્ગલં મમ માત્રે ચ મહાલક્ષ્મ્યૈ સુમઙ્ગલમ્ ॥ ૧૫॥

સીતાસ્તોત્રં સુસમ્પૂર્ણં સીતાનુગ્રહકારકમ્ ।
સીતાનુગ્રહસમ્ભાવં સર્વમઙ્ગલદાયકમ્ ॥ ૧૬॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીસીતાલક્ષ્મીસ્તોત્રં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Footnotes

(૧) સા - Lakshmi

(૨) પદ + કોકનદ + અ\ન (Sun) + આભા

(૩) તા - Lakshmi

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Shri Sita Lakshmi Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on March 6, 2022

Please send corrections to *sanskrit@cheerful.com*